रोल नं० | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 4

**028** **228 (HAG)**

**2014**

# संस्कृतम्

(केवल प्रश्नपत्रम्)

**अवधि : होरात्रयम् ]** **[ पूर्णांक : 100**

**निर्देश** : (i) अस्मिन प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।
(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।
(v) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(vi) खण्डसंख्या अपि लेखनीया।

## खण्ड – 'क' (अपठितांश–अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत –

महामना मदनमोहन मालवीयस्य जन्म प्रयागे एकस्मिन प्रतिष्ठितकुले अभवत्। तस्य पिता संस्कृतस्य विद्वान् आसीत्। अस्य नाम व्रजनाथ मालवीयः आसीत्। शिक्षां प्राप्य मदन मोहन मालवीयः एकस्मिन् राजकीय विद्यालये अध्यापनमकरोत्। युवकः मालवीयः निपुणः वक्ता आसीत्। पश्चात् सः विधिपरीक्षामुत्तीर्य प्रयागस्थे उच्च न्यायालये अधिवक्ताकार्यं प्रारभत्।

(क) एकपदेन उत्तरं लिखत :– 1×2=2
 (i) महामना मदनमोहन मालवीयस्य जन्म कुत्र अभवत् ?
 (ii) निपुणः वक्ता कः आसीत् ?

(ख) पूर्ण वाक्येन उत्तरत :– 1
 (i) मदनमोहनस्य पितुः नाम किम् आसीत् ?

(ग) निर्देशानुसारम् उत्तरत :– 1×2=2
 (i) 'एकस्मिन् राजकीय विद्यालये अध्यापनमकरोत्।' अत्र 'एकस्मिन' कस्य पदस्य विशेषणम् अस्ति ?
 (ii) 'युवकः मालवीयः निपुणः वक्ता आसीत्।' अत्र क्रियापदं किम् ?

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत :–

भारतस्य स्वातंत्र्य–संग्रामे सुभाषचन्द्रस्य महनीयं योगदानम् आसीत्। सुभाषः बाल्यादेव धीरः, साहसी, प्रतिभासम्पन्नश्चासीत्। आई०ए०एस० परीक्षामुत्तीर्ण कृत्वापि सः महापुरुषः जीवन पर्यन्तं जननीजन्मभूमेः सेवापरायणोऽभूत्। अस्माकं राष्ट्रे विदेशीयाः कथं शासनं कुर्वन्ति इतिमत्वा सः निरन्तरं चिन्तामग्नः आसीत्। आङ्ग्लशासकाः तस्य विचारेभ्यः भीताः आसन्। ते तं कारागारे अक्षिपन् किन्तु वीरोऽयं देशस्य स्वतंत्रतायाः कृते स्वप्रयासं नात्यजत्। राष्ट्र सेवार्थ अयं महापुरुषः सर्वदा मनसा, वाचा, कर्मणा च समर्पितः आसीत्।

(क) एक पदेन प्रश्नानां उत्तराणि लिखत :– 1×2=2
 (i) भारतस्य स्वातंत्र्य–संग्रामे कस्य महनीयं योगदानमासीत् ?
 (ii) सुभाषचन्द्रं कारागारे के अक्षिपन् ?

(ख) पूर्ण वाक्येन उत्तरत :– 2×2=4
 (i) सुभाषः बाल्यादेव कीदृशः आसीत् ?
 (ii) सुभाषस्य विचारेभ्यः भीता के आसन् ?

(ग) यथानिर्देशम् उत्तरत :– 1×2=2
 (i) 'सः निरन्तरं चिन्तामग्नः आसीत्।' अस्मिन वाक्ये 'सः' इति सर्वनामस्य संज्ञापदं लिखत।
 (ii) 'ते तं कारागारे अक्षिपन्।' अत्र कतृपदं किम् ?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 2



[ Turn Over

## खण्ड – 'ख' (रचनात्मकं लेखनम्)

3. युस्माकं विद्यालये एका चित्रकला प्रतियोगिता समायोजिता। अस्मिन् विषये स्वमित्रं दीपकं प्रति प्रेषितं पत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयित्वा उत्तरपुस्तिकायां लिखत – 1×5=5

प्रिय मित्र दीपक,

(i) ........ विद्यालये एका चित्रकला प्रतियोगिता समायोजिता। अस्मिन् प्रतियोगितायां नगरस्य अनेके विद्यालयाः (ii) ........ अकुर्वन्। मम कलाकृतिः निर्णायकैः (iii) ........ प्रशंसिता। किन्तु अहं प्रथमं स्थानमवाप्तुं न (iv) ........। मया द्वितीयं पुरस्कारं प्राप्तम्, कन्या विद्यालयस्य छात्रया सुजातया प्रथमम् (v) ........।

भवदीयः

आलोकः

| |
|---|
| **मञ्जूषा** – प्रतिभागम्, अस्माकम्, अर्जितम्, भृशम्, शक्नोमि स्म। |

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत् – 1×5=5

अरुणः – संस्कृतं मे अतीव ........।

वरुणः – मित्र अरुण, सत्यंवदसि। मह्यम् अपि ........ भृशं रोचते।

अरुणः – संस्कृत साहित्ये ........ संस्कृतिः सन्निहिता।

वरुणः – संस्कृतं ........ वयं अस्माकं संस्कृतेः संरक्षणं करिष्यामः।

अरुणः – गीर्वाणवाणी सर्वासां ........ भाषानां जननीरूपा वर्तते।

| |
|---|
| **मञ्जूषा** – अधीत्य, अस्माकम्, रोचते, भारतीयानाम्, एतत् |

5. 'हिमालयः' इमं विषयमधिकृत्य पञ्चवाक्येषु एकम् अनुच्छेदं लिखत। सहायतार्थ शब्दमञ्जूषा अधः दत्ता। 2×5=10

| |
|---|
| **मञ्जूषा** – देशस्य, तिष्ठति, पर्वतराजः, अनेकानि विभाति, शुभ्रमुकुटः, शिखराणि, औषधयः, ऋषयः, कुर्वन्ति, नद्यः, निर्गच्छन्ति। |

## खण्ड – 'ग' (अनुप्रयुक्त व्याकरणम्)

6. अधोलिखितेषु रेखांकित पदेषु सन्धिं/सन्धि विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत – 1×3=3

(क) रामः लवकुशौ आसनार्दम् उपवेशयति।

(ख) दयानन्दः यावत् + जीवनं समाज सेवामकरोत्।

(ग) जगदीश्वरः विश्वस्य रक्षकः।

7. रेखांकित पदेषु समासं/समासविग्रहं कृत्वा लिखत– 1×4=4

(क) छात्राः यथास्थानम् उपविशन्ति।

(ख) रामः च श्यामः च पठतः।

(ग) त्रिनेत्रः हिमालये निवसति।

(घ) राज्ञः पुरुषः तत्र तिष्ठति।

8. रेखांकित पदेषु प्रकृति–प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत – 1×5=5

(क) बालकाः कम्प् + शानच् वृक्षं पश्यन्ति।

(ख) छात्रस्य अपराधः क्षम् + तव्यत्।

(ग) स्रोतस्य जलं पा + अनीयर् भवति।

(घ) बुद्धि + मतुप् नारी सर्वदा पूजनीया।

(ङ) बालक + टाप् नृत्यं करोति।

9. मञ्जूषाया सहायतया निम्नलिखित वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत – 1×5=5

(क) असत्यं ........ न वाच्यम्।

(ख) अस्माकं पर्यावरणं ........ प्रदूषितमस्ति।

(ग) ........ जीवेत् सुखं जीवेत्।

(घ) ........ समयस्य सदुपयोगः करणीयः।

(ङ) विद्यया ........ सुखं नास्ति।

| |
|---|
| **मञ्जूषा** – भृशम्, यावत्, कदापि, विना, सर्वदा |

10. अधोलिखित वाक्यानां वाच्य परिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत – 1×3=3

(क) छात्राः पाठं पठन्ति।

(ख) रमया पुस्तकं पठितम्।

(ग) जनाः श्रमेण वैभवं लभन्ते।

11. घटिकां दृष्ट्वा शब्देषु लिखत गीताः कदा किं करोति ? 1×4=4



5.00 बजे प्रातः 8.45 बजे प्रातः 4.30 बजे अपराह्न 10.15 बजे रात्रि

(क) गीताः प्रातः ........................................ वादने स्वाध्यायं करोति।
(ख) सा ........................................ वादने विद्यालयं गच्छति।
(ग) सा अपराह्न ........................................ वादने गृहम् आगच्छति।
(घ) गीता रात्रौ ........................................ वादने शयनं करोति।

12. अधोलिखितवाक्येषु अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्त स्थानपूर्ति संस्कृतेन कृत्वा लिखत् – 1×2=2

(क) अस्माकं कक्षायां (40) ........................................ छात्रा सन्ति।

(ख) तस्य मञ्जूषायां (55) ........................................ रूप्यकाणि सन्ति।

13. अधोलिखितेषुवाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत – 1×4=4

(क) जनाः गृहेषु निवसति। (ख) किं छात्राः विद्यालये गच्छन्ति ?
(ग) इदमं फलं परिपक्वः नास्ति। (घ) मम विद्यालयस्य परितः पुष्पाणि विकसन्ति।

## खण्ड – 'घ' (पठित अवबोधनम्)

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत –

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसतिस्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद–'कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरूथः ? अयमेकस्तावद्विभज्य भुज्यताम्।

(क) एक पदेन उत्तरत – (i) राजसिंहः कुत्र वसति स्म ? 1

(ख) पूर्णवाक्येन उत्तरत – (i) बुद्धिमती कस्य भार्या आसीत् ? (ii) गहनकानने सा किं ददर्श ? 1×2=2

(ग) निर्देशानुसारम् उत्तरत– 1×2=2

(i) 'सा एकं व्याघ्रं ददर्श', अत्र 'ददर्श' पदस्य कर्तृपदं किम् ? (ii) 'काननम्' अस्य शब्दस्य पर्यायपदं लिखत।

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत –

क्रोधो हि शत्रुः प्रथमो नराणां,
देहस्थितो देहविनाशनाय।
यथास्थितः काष्ठगतो हि वह्निः,
स एव वह्निर्दहते शरीरम्।।

(क) एक पदेन उत्तरत – (i) नराणां प्रथमो शत्रुः कः ? 1
(ख) पूर्णवाक्येन उत्तरत – (i) क्रोधः नराणां कीदृशो शत्रुः ? (ii) काष्ठगतो वह्निः कं दहते ? 1×2=2
(ग) निर्देशानुसारम् उत्तरत – 1×2=2
(i) 'काष्ठगतो वह्निः' अत्र विशेष्यपदं किम् ? (ii) 'वह्निर्दहते शरीरम्' अत्र कर्तृपदं किमस्ति ?

16. अधोलिखितं नाट्यांशं पठित्वा तदाधारित प्रश्नान् उत्तरत –

रामः – अहो! उदात्तरम्यः समुदाचारः। किं नामधेयो भवतोर्गुरुः ?
लवः – ननु भगवान् वाल्मीकिः।
रामः – केन सम्बन्धेन ?
लवः – उपनयनोपदेशेन।
रामः – अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि।
लवः – न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

रामः – अहो माहात्म्यम्।
कुशः – जानाम्यहं तस्य नामधेयम्।
रामः – कथ्यताम्।
कुशः – निरनुक्रोशो नाम . . . .
रामः – वयस्य, अपूर्वं खलु नामधेयम्।

(क) एकपदेन उत्तरत – (i) लवकुशयोः गुरुः कः ? 1

(ख) पूर्णवाक्येन उत्तरत – 1×2=2
(i) केन सम्बन्धेन वाल्मीकिः लवकुशयोः गुरुरस्ति ? (ii) तपोवने कस्य नाम कश्चिद् न व्यवहरति ?

(ग) निर्देशानुसारम् उत्तरत – 1×2=2
(i) 'भगवान् वाल्मीकिः' अत्र विशेष्यपदं किम् ?
(ii) 'तपोवने तस्यनाम न व्यवहरति' अत्र क्रियापदं किम् ?

17. अधोलिखित श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत –

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः। 1×3=3
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।
(i) आलस्यं जनानां शरीरे एव स्थितः शत्रुः ..........
(ii) उद्यमः मनुष्याणां सर्वोत्तमो .................... अस्ति।
(iii) सततं उद्यमं कृत्वा जनः कदापि दुखी .......... ।

(ख) विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्। 1×3=3
अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।
(i) विचित्रे अस्मिन् संसारे किमपि निरर्थकं .......... विद्यते।
(ii) सर्वेषां वस्तूनां यथास्थानम् उपयोगिता .......... ।
(iii) यथाधावने अश्वः श्रेष्ठः तथा भारवहने .......... श्रेष्ठः।

18. अधोलिखित श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत –

(क) संपत्तौ च विपत्तौ च महतामेकरुपता। ½ ×3=1½
उदये सविता रक्तो रक्तश्चास्तमये तथा।।
महताम् (i) .......... (ii) .......... भवति। (यथा) सविता उदये (iii) .......... ।

(ख) एक एव खगो मानी वने वसति चातकः। ½ ×3=1½
पिपासितो वा म्रियते याचते वा पुरन्दरम्।।
एक एव मानी खगः (i) .......... वने वसति वा पिपासितः (ii) .......... पुरन्दरम् (iii) .......... वा।

19. रेखाङ्कित पदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तर पुस्तिकायां लिखत – 1×4=4

(क) उद्याने <u>पक्षिणां</u> कलरवं मनः प्रसादयति।
(ख) <u>बालिकाः</u> गीतं गायन्ति।
(ग) व्यायामः दुर्वलं जनमपि <u>सुदर्शनं</u> करोति।
(घ) <u>भयाकुलचित्तः</u> व्याघ्रः पलायितः।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तर पुस्तिकायां लिखत– ½ ×8=4

(i) विचित्रा दैवगतिः।
(ii) तत्रनिहितामेकां मञ्जूषाम् आदाय पलायितः।
(iii) रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।
(iv) चौरः एव उच्चैः क्रोशितुमारभत
(v) अगृहणाच्च, परं विचित्रमघटत।
(vi) 'चौरोऽयं चौरोऽयम्' इति।
(vii) तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन्।
(viii) चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत्

21. संस्कृतेन वाक्य प्रयोगं कुरुत – 1×3=3

(क) निमित्तम् (ख) पुष्पाणि (ग) जलाशयः

********